# प्राक्शास्त्री

## २०७८

पूर्णाङ्काः - १००

विषयः :- ऐच्छिकज्योतिषम् — उत्तीर्णाङ्काः - ४०

पत्रम् :- तृतीयम् — समयः - घण्टात्रयम्

### खण्ड-क

**समीचीनोत्तरस्य प्रकोष्ठे ☑ संकेतो देयः –** २०x१=२०

१. “मुहूर्तचिन्तामणिः” ग्रन्थस्य रचयिता कः ?
(क) वराहमिहिरः ☐ (ख) गणेशदैवज्ञः ☐
(ग) रामदैवज्ञः ☐ (घ) रामनाथः ☐

२. सौरपरिवारस्य स्थूलतमो ग्रहः कः ?
(क) सूर्यः ☐ (ख) शनिः ☐ (ग) शुक्रः ☐ (घ) बृहस्पतिः ☐

३. पञ्चमीतिथेः स्वामी कः ?
(क) सर्पः ☐ (ख) रविः ☐ (ग) गणेशः ☐ (घ) शिवः ☐

४. शतभिषानक्षत्रस्य तारासंख्या कति ?
(क) ४ ☐ (ख) ३ ☐ (ग) १ ☐ (घ) १०० ☐

५. आर्द्रानक्षत्रस्याधिपः कः ?
(क) राक्षसः ☐ (ख) महादेवः ☐ (ग) ब्रह्मा ☐ (घ) इन्द्रः ☐

६. कुम्भराशेः स्वामी कः ?
(क) चन्द्रः ☐ (ख) शनिः ☐ (ग) भौमः ☐ (घ) शुक्रः ☐

७. याम्योत्तरक्षितिजवृत्तयोः सम्पातबिन्दुः कः ?
(क) गोलसन्धिः ☐ (ख) निरक्षखमध्यम् ☐
(ग) कदम्बस्थानम् ☐ (घ) समस्थानम् ☐

८. विंशोत्तरीदशायां कति वर्षाणि भवन्ति ?
(क) १०० ☐ (ख) १०८ ☐ (ग)८० ☐ (घ) १२० ☐

९. भौमः कुत्र नीचस्थो भवति ।
(क) मकरराशौ ☐ (ख) मेषराशौ ☐ (ग) कर्कटराशौ ☐ (घ) वृश्चिकराशौ ☐

१०. जन्मकुण्डल्यां गृहविचारः कुतः क्रियते ?
(क) एकादशभावात् ☐ (ख) चतुर्थभावात् ☐
(ग) प्रथमभावात् ☐ (घ) दशमभावात् ☐

११ सूर्यस्य शत्रुः कः ?
(क) भौमः ☐ (ख) बुधः ☐ (ग) शुक्रः ☐ (घ) चन्द्रः ☐

**क्रमशः**

१२. समराशौ प्रथमा होरा कस्य भवति ?
(क) चन्द्रमसः ☐ (ख) सूर्यस्य ☐
(ग) बुधस्य ☐ (घ) सिंहस्य ☐

१३. स्वातीनक्षत्रे जातस्य बालकस्य कस्य ग्रहस्य आद्यदशा भवति ?
(क) भौमः ☐ (ख) शनैशचरः ☐ (ग) शुक्रः ☐ (घ) राहुः ☐

१४. कासां तिथीनां संज्ञा नन्दा अस्ति ?
(क) ४, ९, १४ ☐ (ख) ५, १०, १५ ☐
(ग) १, ६, ११ ☐ (घ) २, ७, १२ ☐

१५. ग्रहलाधवे सूर्यस्य ध्रुवाङ्काः कति पठिताः ?
(क) ०।१°।४९'।११" ☐ (ख) ०।३°।४६'।११" ☐
(ग) ९।२°।४५'।०" ☐ (घ) ७।१५°।४२'।०" ☐

१६. याम्योत्तरवृत्ते पूर्वापरनाडीवृत्तयोरन्तरे भवन्ति ।
(क) क्रान्त्यंशाः ☐ (ख) अक्षांशाः ☐ (ग)लम्बांशाः ☐ (घ) नतांशाः ☐

१७. एकस्मिनहोरात्रे कति घटिका भवन्ति ?
(क) २४ ☐ (ख) ३० ☐ (ग) ९० ☐ (घ) ६० ☐

१८. रविमन्दोच्चस्य प्रमाणं किम् ?
(क) १८° ☐ (ख) १०८° ☐ (ग) ७८° ☐ (घ) ६८° ☐

१९. भास्कराचार्यस्य जन्म कदा अभवत् ।
(क) १०३६ शकाब्दे ☐ (ख) १०३४ शकाब्दे ☐
(ग) १०३७ शकाब्दे ☐ (घ) १०४६ शकाब्दे ☐

२०. रोहिणीनक्षत्रस्य स्वरूपं कीदृशं वर्तते ?
(क) शकटरूपम् ☐ (ख) मर्दलाकरम् ☐
(ग) मणिसदृशम् ☐ (घ) तोरणाकारम् ☐

–: ० :–

Nepal Sanskrit University [P.S.]

# प्राक्शास्त्री
## २०७८

पूर्णाङ्काः - १००

विषयः :- ऐच्छिक ज्योतिषम् उत्तीर्णाङ्काः - ४०

पत्रम् :- तृतीयम् समयः - घण्टात्रयम्

(क) परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैश्शब्दैर्लेखनीयम् ।

(ख) दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ॥

### खण्ड-ख

चतुर्दश प्रश्नाः समाधेयाः – १४×४ = ५६

१. किं नाम पञ्चाङ्गम् ?

२. चरसंज्ञकनक्षत्राणां नामानि लिखत ।

३. शुक्रस्य संक्षिप्तपरिचयो देयः ।

४. सूर्यादिग्रहाणामुच्चराशीनां नामानि कानि ?

५. भौमग्रहस्य नैसर्गिकमित्र-सम-शत्रुग्रहाणां नामानि लिखत ।

६. नाडीवृत्तस्य परिभाषा का ?

७. किं नाम उदयास्तसूत्रम् ?

८. विवाहानन्तरं प्रथमवर्षे ज्यैष्ठादौ पत्यादिगृहवासफलं लिखत ।

९. सायं घण्टादि ६।२४ वादनसमये जातस्य शिशो भयातभभोगौ साध्यौ ।

तद्दिने तिष्यनक्षत्रस्य घट्यः ३२।२०

गतदिने पुनर्वसुनक्षत्रस्य घट्यः २५।४७

सूर्योदयः ५।५०

१०. लग्नस्थानात् विचारणीया विषयाः के ?

११. आर्द्रानक्षत्रे जातस्य आद्ययोगिनीदशा साध्या ।

१२. लग्नस्थानस्थितयोः सूर्यचन्द्रयोः फलानि लिखत ।

१३. यत्र पलभा ६।१० तत्र चरखण्डानि साध्यानि ।

१४. यत्र लग्नम् ८।२४°।१८'।२२" तत्र द्वादशांशकुण्डली निर्मेया ।

१५. ज्योतिषशास्त्रस्य कति विभागाः सन्ति ? के च ते ?

१६. कलशवास्तुचक्रस्य प्रयोजनं किम् ?

१७. विंशोत्तरीदशानुसारेण ग्रहाणां दशावर्षप्रमाणं लिखत ।

१८. विशोत्तरीदशायां चन्द्रदशाफलं विलिखत ।

क्रमशः

### खण्ड-ग

प्रश्नत्रयं समाधेयम् – ३×८ = २४

१९. अन्नप्राशनमुहूर्तो लिखत ।

२०. गणेशदैवज्ञस्य परिचयो देयः ।

२१. यदा अहर्गणः २३७८, चक्रम् = ३४ तदा अहर्गणोत्पन्नभौमसाधनं क्रियताम् ।

२२. सूर्यग्रहस्य स्वरूपं विलिख्य ग्रहाणां नैसर्गिकबलञ्च लिखत ।

२३. यत्र स्पष्टसूर्यः ३।२३°।४७'।४९" सूर्योदयादिष्टघट्यादिकम् १४।१२, अत्र सारणीतः प्रथमलग्नं साधयत ।

–: ० :–